No. of Printed Pages: 02

(15)

# SARDAR PATEL UNIVERSITY,
## M.A. (PREVIOUS) (EXTERNAL) EXAMINATION,
## 2014
**Thursday, 27th March,**
**10.30 A.M. TO 01.30 P.M.**
**SANSKRIT LITERATURE**
**PAPER-I**

**TOTAL MARKS: 100**

(१) शिशुपालवधम् (प्रथमसर्गः) महाकवि माघः ।
(२) नैषधीयचरितम् (प्रथमसर्गः) महाकवि श्रीहर्षः ।
(३) कादम्बरी (महाश्वेतावृत्तान्तः) बाणभट्टः ।

प्रश्न-१ (अ) નીચેનામાંથી ગમે તે બે શ્લોકોનો અનુવાદ કરો. (०८)

(१) चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम् ।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः ॥

(२) विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽस्मि निबर्हितांहसा ।
तथापि शुश्रूषुरहं गरीयसीर्गिरोऽथवा श्रेयसि केन तृप्यते ॥

(३) समुत्क्षिपन् यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः ।
त्रसत्तुषाराद्रिसुतासससम्भ्रमस्वयङ्ग्रहाश्लेषसुखेन निष्क्रयम् ॥

(४) बलावलेपादघुनाऽपि पूर्ववत्प्रबाध्यते तेन जगज्जिगीषुणा ।
सतीव योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि ॥

प्रश्न-१ (ब) નીચેનામાંથી ગમે તે બે સસંદર્ભ સમજાવો. (०६)

(१) गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः ।
(२) बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः ।
(३) ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः ।
(४) स बाल आसीद्वपुषा चतुर्भुजो मुखेन पुर्णेन्दुनिभस्त्रिलोचनः ।

प्रश्न-१ (क) નીચેનામાંથી ગમે તે બે શ્લોકોનો અનુવાદ કરો. (०८)

(१) पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा ।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥

(२) न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तम् ।
तदात्मताध्यातघवा रते च का चकार वा न स्वमनोभवोद्भवम् ? ॥

(३) विचिन्वतीः पान्थपतङ्गहिंसनैरपुण्यकर्माण्यलिकज्जलच्छलात् ।
व्यलोकयच्चम्पककोरकाबलीः स शम्बरारेर्बलिदीपिका इव ॥

(४) रथाङ्गभाजा कमलानुषङ्गिणा शिलीमुखस्तोमसखेन शार्ङ्गिणा ।
सरोजिनीस्तम्बकदम्बकैतवान्मृणालशेषाहिभुवाऽन्वयायि यः ॥

प्रश्न-१ (ड) નીચેનામાંથી ગમે તે બે સસંદર્ભ સમજાવો. (०६)

(१) त्यजन्त्यसून्शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् ।
(२) स्थितैः समाधाय महर्षिवार्घककाद्वने तदातिथ्यमशिक्षि शारिवभिः ।
(३) इतीव पान्थं शपतः पिकान् द्विजान् सखेदमैक्षिष्ट स लोहितेक्षणवान् ।
(४) धिगीदृशन्ते नृपतेः कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ।

પ્રશ્ન-૨ 'शिशुपालवधम्' મહાકાવ્યનું આલોચનાત્મક મૂલ્યાંકન કરો. (૧૬)

અથવા

પ્રશ્ન-૨ નીચેની વિશે સમીક્ષાત્મક નોંધ લખો. (૧૬)

(૧) નારદ દ્વારા શ્રીકૃષ્ણ સ્તુતિ.

(૨) શિશુપાલના પૂર્વાવતારનાં દુષ્કૃત્યો.

પ્રશ્ન-૩ 'नैषधं विद्वदौषधम्' - આ વિધાનની સમીક્ષા કરો. (૧૬)

અથવા

પ્રશ્ન-૩ નીચેની વિશે સમીક્ષાત્મક નોંધ લખો. (૧૬)

(૧) નલ વર્ણન.

(૨) હંસ વિલાપ.

પ્રશ્ન-૪ (અ) નીચેનામાંથી ગમે તે એકનો અનુવાદ કરો. (૧૧)

(१) मुहूर्तं विश्रान्तश्च तस्य सरस उत्तरे तीरप्रदेशे समुच्चरन्तमुन्मुक्तकवलेन निश्चलश्रवणपुटेन तन्मुखीभूतेनोद्ग्रीवेणेन्द्रायुधेन प्रथममाकर्णितं श्रुतिसुभगं वीणातन्त्रीझंकारमिश्रमानुषं गीतशब्दमशृणोत् । श्रुत्वा च कुतोऽत्र विगतमर्त्यसंपाते प्रदेशे गीतध्वनेः संभूतिरिति समुपजातकौतुकः कमलिनीपत्रस्रस्तरादुत्थाय तामेवगीतसंपातसूचितां दिशिं चक्षुः प्राहिणोत् । अतिदवीस्तया तु तस्य प्रदेशस्य प्रयत्नव्यापृतलोचनोऽपि विलोकयन्न किंचिद्ददर्श । तमेव केवलमनवरतं गीतशब्दं शुश्राव ।

(२) प्रविश्याद्राक्षीच्चतुःस्तम्भस्फटिकमण्डपिकातलप्रतिष्ठितम्, अचिरोद्धतैरार्द्रैर्दलशिखरगलज्जल-बिन्दुभिरुर्घ्वविपाटितचन्द्रबिम्बदलैरिवनिजाट्टहासावयवैरिव पाञ्चजन्यसहोदरैरिव क्षीरोदहृदया-कारैरु पपादितमौक्तिकमुकुटविभ्रमैः शुचिभिर्मन्दाकिनीपुण्डरीकैः कृतार्चनम्, अमलमुक्ताशिला-घटितलिङ्गम्, अशेषत्रिभुवनवन्दितचरणं चराचरगुरुं चतुर्मुखं भगवन्तं त्र्यम्बकम् ।

પ્રશ્ન-૪ (બ) નીચેનામાંથી ગમે તે ત્રણ સસંદર્ભ સમજાવો. (૦૯)

(१) इदमपि खल्वमृतमिव सर्वेन्द्रियाह्लादनसमर्थम् ।

(२) बौद्धबुद्धिमिव निरालम्बनाम्, वैदेहीमिव प्राप्तज्योतिः प्रवेशाम् ।

(३) बलवति हि द्वन्द्वानां प्रवृत्तिः।

(४) अदूरकोपा हि मुनिजनप्रकृतिः ।

(५) धैर्यघना हि साधवः ।

(६) सुहृदा सुहृदसन्मार्गप्रवृत्तो यावच्छक्तितः सर्वात्मना निवारणीय इति ।

પ્રશ્ન-૫ કથા અને આખ્યાયિકાનાં લક્ષણો આપી, 'कादम्बरी' નો સાહિત્યપ્રકાર ચર્ચો. (૨૦)

અથવા

પ્રશ્ન-૫ નીચેના વિશે સમીક્ષાત્મક નોંધ લખો. (૨૦)

(૧) મહાશ્વેતાનું પાત્રાલેખન.

(૨) उत्प्रेक्षा तु बाणस्य ।

ॐॐॐॐॐ